॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय १०१

इति प्रतिसमादिष्टो हनूमान्मारुतात्मजः ।
प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ १॥

प्रविश्य तु महातेजा रावणस्य निवेशनम् ।
ददर्श शशिना हीनां सातङ्कामिव रोहिणीम् ॥ २॥

निभृतः प्रणतः प्रह्वः सोऽभिगम्याभिवाद्य च ।
रामस्य वचनं सर्वमाख्यातुमुपचक्रमे ॥ ३॥

वैदेहि कुशली रामः ससुग्रीवः सलक्ष्मणः ।
कुशलं चाह सिद्धार्थो हतशत्रुररिन्दमः ॥ ४॥

विभीषणसहायेन रामेण हरिभिः सह ।
निहतो रावणो देवि लक्ष्मणस्य नयेन च ॥ ५॥

पृष्ट्वा च कुशलं रामो वीरस्त्वां रघुनन्दनः ।
अब्रवीत्परमप्रीतः कृतार्थेनान्तरात्मना ॥ ६॥

प्रियमाख्यामि ते देवि त्वां तु भयः सभाजये ।
दिष्ट्या जीवसि धर्मज्ञे जयेन मम संयुगे ॥ ७॥

लब्धो नो विजयः सीते स्वस्था भव गतव्यथा ।
रावणः स हतः शत्रुर्लङ्का चेयं वशे स्थिता ॥ ८॥

मया ह्यलब्धनिद्रेण धृतेन तव निर्जये ।
प्रतिज्ञैषा विनिस्तीर्णा बद्ध्वा सेतुं महोदधौ ॥ ९॥

सम्भ्रमश्च न कर्तव्यो वर्तन्त्या रावणालये ।
विभीषण विधेयं हि लङ्कैश्वर्यमिदं कृतम् ॥ १०॥

तदाश्वसिहि विश्वस्ता स्वगृहे परिवर्तसे ।
अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः ॥ ११॥

एवमुक्ता समुत्पत्य सीता शशिनिभानना ।
प्रहर्षेणावरुद्धा सा व्याजहार न किं चन ॥ १२॥

अब्रवीच्च हरिश्रेष्ठः सीतामप्रतिजल्पतीम् ।
किं त्वं चिन्तयसे देवि किं च मां नाभिभाषसे ॥ १३॥

एवमुक्ता हनुमता सीता धर्मे व्यवस्थिता ।
अब्रवीत्परमप्रिता हर्षगद्गदया गिरा ॥ १४॥

प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितम् ।
प्रहर्षवशमापन्ना निर्वाक्यास्मि क्षणान्तरम् ॥ १५॥

न हि पश्यामि सदृशं चिन्तयन्ती प्लवङ्गम ।
मत्प्रियाख्यानकस्येह तव प्रत्यभिनन्दनम् ॥ १६॥

न च पश्यामि तत्सौम्य पृथिव्यामपि वानर ।
सदृशं मत्प्रियाख्याने तव दातुं भवेत्समम् ॥ १७॥

हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च ।
राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितुम् ॥ १८॥

एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवङ्गमः ।
प्रगृहीताञ्जलिर्वाक्यं सीतायाः प्रमुखे स्थितः ॥ १९॥

भर्तुः प्रियहिते युक्ते भर्तुर्विजयकाङ्क्षिणि ।
स्निग्धमेवंविधं वाक्यं त्वमेवार्हसि भाषितुम् ॥ २०॥

तवैतद्वचनं सौम्ये सारवत्स्निग्धमेव च ।
रत्नौघाद्विविधाच्चापि देवराज्याद्विशिष्यते ॥ २१॥

अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः ।
हतशत्रुं विजयिनं रामं पश्यामि यत्स्थितम् ॥ २२॥

इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे ।
हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिता पुरा ॥ २३॥

क्लिश्यन्तीं पतिदेवां त्वामशोकवनिकां गताम् ।
घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः ॥ २४॥

राक्षस्यो दारुणकथा वरमेतं प्रयच्छ मे ।
इच्छामि विविधैर्घातैर्हन्तुमेताः सुदारुणाः ॥ २५॥

मुष्टिभिः पाणिभिश्चैव चरणैश्चैव शोभने ।

घोरैर्जानुप्रहारैश्च दशनानां च पातनैः ॥ २६ ॥

भक्षणैः कर्णनासानां केशानां लुञ्चनैस्तथा ।
भृशं शुष्कमुखीभिश्च दारुणैर्लङ्घनैर्हतैः ॥ २७ ॥

एवम्प्रकारैर्बहुभिर्विप्रकारैर्यशस्विनि ।
हन्तुमिच्छाम्यहं देवि तवेमाः कृतकिल्बिषाः ॥ २८ ॥

एवमुक्ता महुमता वैदेही जनकात्मजा ।
उवाच धर्मसहितं हनूमन्तं यशस्विनी ॥ २९ ॥

राजसंश्रयवश्यानां कुर्वतीनां पराज्ञया ।
विधेयानां च दासीनां कः कुप्येद्वानरोत्तम ॥ ३० ॥

भाग्यवैषम्य योगेन पुरा दुश्चरितेन च ।
मयैतेत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ॥ ३१ ॥

प्राप्तव्यं तु दशा योगान्मयैतदिति निश्चितम् ।
दासीनां रावणस्याहं मर्षयामीह दुर्बला ॥ ३२ ॥

आज्ञप्ता रावणेनैता राक्षस्यो माम् अतर्जयन् ।
हते तस्मिन्न कुर्युर्हि तर्जनं वानरोत्तम ॥ ३३ ॥

अयं व्याघ्रसमीपे तु पुराणो धर्मसंहितः ।
ऋक्षेण गीतः श्लोको मे तं निबोध प्लवङ्गम ॥ ३४ ॥

न परः पापमादत्ते परेषां पापकर्मणाम् ।
समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः ॥ ३५ ॥

पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम ।
कार्यं कारुण्यमार्येण न कश्चिन्नापराध्यति ॥ ३६ ॥

लोकहिंसाविहाराणां रक्षसां कामरूपिणम् ।
कुर्वतामपि पापानि नैव कार्यमशोभनम् ॥ ३७ ॥

एवमुक्तस्तु हनुमान्सीतया वाक्यकोविदः ।
प्रत्युवाच ततः सीतां रामपत्नीं यशस्विनीम् ॥ ३८ ॥

युक्ता रामस्य भवती धर्मपत्नी यशस्विनी ।
प्रतिसन्दिश मां देवि गमिष्ये यत्र राघवः ॥ ३९ ॥

एवमुक्ता हनुमता वैदेही जनकात्मजा ।
अब्रवीद्द्रष्टुमिच्छामि भर्तारं वानरोत्तम ॥ ४० ॥

तस्यास्तद्वचनं श्रुत्वा हनुमान्पवनात्मजः ।
हर्षयन्मैथिलीं वाक्यमुवाचेदं महाद्युतिः ॥ ४१ ॥

पूर्णचन्द्राननं रामं द्रक्ष्यस्यार्ये सलक्ष्मणम् ।
स्थिरमित्रं हतामित्रं शचीव त्रिदशेश्वरम् ॥ ४२ ॥

तामेवमुक्त्वा राजन्तीं सीतां साक्षादिव श्रियम् ।
आजगाम महावेगो हनूमान्यत्र राघवः ॥ ४३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com